F
3447

Mysore University Oriental Library
on 25/1/32
25

SATTAKOTI.
वाणीं भजंत गैर्वाणीं
SREE CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY
FORT, BANGALORE.
0 2253

शतकोटिः

(गदाधरीय सत्प्रतिपक्ष क्रोडपत्रम्)

59
2082

महीशूरपुर वास्तव्येन पण्डितप्रवरेण

रामशास्त्रिणा विरचिता

——(*)——

श्रीकाञ्ची प्रतिवादिभयङ्करानन्ताचार्येण

संस्कृता परिशोधिता च

श्रीसुदर्शनमुद्राक्षरशालायां

अमुद्रयत ।

श्रीकाञ्ची ।

(द्वितीयावृत्तिः)

१९११

इदानीमेतन्मूल्यम्—०-५-०.

KARNATAKA PUBLISHING HOUSE

कर्णाटक-पब्लिशिंग-हौस

SREE CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY
वाणीं भजत गैर्वाणीं
FORT, BANGALORE.

श्रीः ।

श्रीहयग्रीवाय नमः ।

सत्प्रतिपक्ष-शतकोटिः ।

पक्षतावच्छेदकविशिष्टपक्षविषयकत्वाव्यापकसाध्यतावच्छेदकविशिष्टसाध्यविषयकत्वाव्यापकपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकयद्धर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका सती तद्धर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यद्रूपावच्छिन्नविषयिता तद्रूपावच्छिन्नत्वमिति सत्प्रतिपक्षलक्षणम् । अस्यायमनुगमः- निरुक्तप्रतिबध्यता विशिष्टधर्मवत्त्वम् । प्रतिबध्यतावैशिष्ट्यञ्चाधेयतासम्बन्धेन । आधेयता च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धावच्छिन्ना । स्वनिष्ठावच्छेदकता च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्ना । स्वाधिकरणत्वञ्च स्वावच्छिन्नविषयताशाल्यनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयत्वसम्बन्धेन । भेदप्रतियोगितावच्छेदकता च स्वनिरूपितप्रतिबन्धकतावत्त्वस्वावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकत्वोभयसम्बन्धेनेति ।

अथात्र ह्रदो वह्निमानित्यादौ वह्न्यभाववह्न्यभावव्याप्यव्याप्योभयवद्ध्रदेऽतिव्याप्तिः, तद्विषयताया निरुक्तप्रतिबन्धकत्वजनकतावच्छेदकत्वयोस्सत्त्वात् । ॥१॥

नच स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नविषयकत्वं अनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नाघटितत्वरूपविशिष्टान्तराघटितत्वस्य मेयत्वविशिष्टसत्प्रतिपक्षेऽतिव्याप्तिवारणायावश्यं निवेशनीयतया तत एव नोक्तातिप्रसङ्गः, उक्तविशिष्टस्य वह्न्यभाववद्ध्रदरूपताद्दशविशिष्टान्तरघटितत्वा

दिति वाच्यम् ॥२॥ बाधघटितसत्प्रतिपक्षे ऽव्याप्तिवारणाय विशिष्टान्तर विषयितायां प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वव्रजनकतानतिरिक्तवृत्तित्व स्यापि निवेशनीयतया उक्तातिप्रसङ्गतादवस्थ्यात् । वह्न्यभाववद्ध्रदविषयक त्वस्य प्रतिबन्धकतानतिरिक्तवृत्तित्वेपि जनकतानतिरिक्तवृत्तित्वविरहात् ॥३॥

नच यद्रूपावच्छिन्नविषयकत्वं निरुक्तविरोध्यनुमितिजनकतानतिरिक्तवृत्ति त्तादृशरूपान्तराघटितत्वस्य विवक्षणेपि मेयत्वविशिष्टसत्प्रतिपक्षातिव्याप्तिवारण सम्भवान्निरुक्तविशिष्टेनातिव्याप्तिरिति वाच्यम् ॥४॥ वह्न्यभावव्याप्यवह्न्यभाव व्याप्यव्याप्यवद्ध्रदरूपसत्प्रतिपक्षाव्याप्तिवारणाय प्रतिबन्धकतानतिरिक्तवृत्तित्वस्यापि विशिष्टान्तरविषयितायां निवेशनीयतया उक्तविशिष्टेऽतिव्याप्तेर्दुर्वारत्वात् ॥५॥

नच सत्यन्तघटकप्रतिबन्धकतायां निरुक्तजनकतावच्छेदकविषयितात्व व्यापकावच्छेदकताकत्वनिवेशान्नोक्तातिप्रसङ्गः, प्रत्येकज्ञानीयवह्न्यभावव्याप्यव्याप्य वद्ध्रदविषयितायां निरुक्तजनकतावच्छेदिकायां निरुक्तप्रतिबन्धकतावच्छेदकत्व क्षिरहादिति वाच्यम्। ६।निरुक्तजनकतावच्छेदकसत्प्रतिपक्षोन्नायकविषयितायां सत्प्रति पक्षज्ञानप्रतिबन्धकतावच्छेदकत्वविरहेणासम्भवप्रसङ्गेन निरुक्तपरिष्कारासम्भवात्॥

नच यत्किंचिज्जनकतावच्छेदकविषयितात्वव्यापकावच्छेदकताकत्व निवेशा न्नासम्भवः, सत्प्रतिपक्षज्ञानीयप्रतिबन्धकतावच्छेदकतायां तज्ज्ञानीयजनकता वच्छेदकविषयितात्वव्यापकत्वसत्त्वात् ।

नच यत्किंचित्त्वनिवेशादननुगम इति वाच्यम् । स्वविशिष्टप्रतिबन्धकता वत्त्वसम्बन्धावच्छिन्नत्वेन पूर्वोक्तभेदप्रतियोगितावच्छेदकताया विवक्षणीयत्वात् । स्वविशिष्टत्वं स्वनिरूपितत्वस्वावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकता वच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकताविशिष्टत्वोभयसम्ब न्धेन । जनकताविशिष्टत्वं स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन । स्वनिष्ठावच्छेदकता च – स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्ब न्धावच्छिन्ना । स्वाधिकरणत्वंच स्वावच्छेदकविषयितात्वसम्बन्धेन । भेदप्रति योगितावच्छेदकता च – स्वावच्छेदकत्वसम्बन्धावच्छिन्नेति वाच्यम् ॥८॥

जनकतावच्छेदिकायां सामानाधिकरण्यविषयितायां सत्प्रतिपक्षज्ञानीयप्रतिबन्धकतावच्छेदकत्वविरहेण प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षरूपसत्प्रतिपक्षाव्याप्तिप्रसङ्गात् ॥९॥

नचावच्छेदककोटिप्रविष्टानामवच्छेदकत्वानङ्गीकारेण विनिगमनाविरहः प्राप्तां पक्षविषयित्वावच्छिन्नां साध्याभावानुमितिजनकतामादायैव निरुक्तसत्प्रतिपक्षे लक्षणसमन्वयः, तदङ्गीकारेऽपि जनकतावच्छेदकमुख्यविषयतात्वव्यापकत्वस्यैव प्रतिबन्धकतावच्छेदकतायां निवेशेन लक्षणसमन्वयः, तथाचानुक्तातिव्याप्तिरिति वाच्यम् ॥१०॥ जलव्यापकवह्न्यभावसमानाधिकरणजलवान् ह्रदः, शैवालव्यापकवह्न्यभावसमानाधिकरणशैवालवान् ह्रद इति निखिलपरामर्शसाधारण्येन स्वावच्छिन्नविषयतानिरूपितव्यापकत्वविषयतानिरूपितसाध्याभावत्वावच्छिन्नविषयतानिरूपितसामानाधिकरण्याविषयतानिरूपितत्व स्वावच्छिन्नत्वोभयसम्बन्धेन किञ्चिद्धर्मविशिष्टविषयतानिरूपितह्रदत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन उक्तसकलनिश्चयानामेकरूपेण जनकत्वास्वीकारात् । निरुक्तजनकतावच्छेदकविषयतात्वस्य शैवालव्यापकवह्न्यभावसमानाधिकरणशैवालवद्ह्रदविषयतायां सत्त्वेन तत्र जलव्यापको वह्न्यभाव इत्याकारकज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकताया असत्त्वेन निरुक्तसत्प्रतिपक्षाव्याप्तेर्दुर्वारत्वात् तथाचोक्तपरिष्कारासम्भवेनोक्तातिव्याप्तितादवस्थ्यम् ॥११॥

नच जलव्यापको वह्न्यभावः जलवांश्च ह्रदः शैवालव्यापको वह्न्यभावः शैवालवांश्च ह्रद इत्यादिसकलनिश्चयसाधारण्येन, स्वनिरूपितव्यापकत्वनिष्ठप्रकारतावच्छेदकतावच्छेदकावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतानिरूपकत्वस्वनिरूपकनिश्चयविशिष्टत्वोभयसम्बन्धेन वह्न्यभावत्वावच्छिन्नविशेष्यताविशिष्टनिश्चयत्वेनैकप्रतिबन्धकत्वाङ्गीकारात् , निरुक्तानुगतजनकतावच्छेदकविषयितात्वव्यापकत्वं निरुक्तप्रतिबन्धकतावच्छेदकतायामक्षतमिति निरुक्तसत्प्रतिपक्षे लक्षणसमन्वयसम्भवेनोक्तपरिष्कारे न कोपि दोष इति वाच्यम् ॥१२॥ तथापि निरुक्तप्रतिबन्धकतावच्छेदकतायाः वह्न्यभावत्वावच्छिन्नविशेष्यतायामेव सत्त्वेन जनकतावच्छेदकतायाः ह्रदत्वावच्छिन्नविशेष्यतायामेव सत्त्वेन निरुक्तजनकतावच्

वच्छेदकविषयतात्वव्यापकत्वस्य प्रतिबन्धकतावच्छेदकतायामसत्वेन निरुक्तसत्प्रतिपक्षाव्याप्तेर्दुर्वारत्वात्, निरुक्तपरिष्कारस्य सर्वथा असम्भवात् ॥१३॥

नच स्वनिरूपितव्यापकत्वनिष्ठप्रकारतावच्छेदकतावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञानविशिष्ट ज्ञानीयत्वैतदुभयसम्बन्धेन वह्न्यभावत्वावच्छिन्नविशेष्यतानिरूपितविशिष्टप्रकारतानिरूपित ह्रदत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन प्रतिबन्धकतास्वीकारेणोक्तविषयतात्वव्यापकत्वमुक्तावच्छेदकतायामस्त्येवेति निरुक्तपरिष्कारस्सम्भवत्येवेति वाच्यम् ॥१४॥ उक्तरूपेण प्रतिबन्धकत्वाङ्गीकारे चैत्रस्य जलव्यापको वह्न्यभावः जलवान् हद इति ज्ञानसत्वे मैत्रस्य केवलजलवान् ह्रदइति ज्ञानसत्वे मैत्रस्य वह्न्यनुमितिप्रतिबन्धापत्तिः, समानाकारकज्ञानेषु विषयतामेदस्याऽप्रमाणिकतया मैत्रज्ञानीयजलत्वावच्छिन्नप्रकारतायाऽपि चैत्रज्ञानीयवह्न्यभावत्वावच्छिन्नविशेष्यताविशिष्टत्वात्, अतः पूर्वोक्तप्रकारेणैव प्रतिबन्धकतायां वक्तव्यतयोक्ताव्याप्तितादवस्थ्येनोक्तपरिष्कारासम्भवात् । ॥१५॥

नच जनकतावच्छेदकविषयतात्वव्यापकत्वं प्रतिबन्धकतावच्छेदकतावच्छेदकसम्बन्धघटकविषयतात्वसम्बन्धेन निवेश्यम्, अतो नाव्याप्तिः— जनकतावच्छेदकपक्षादिविषयतायां प्रतिबन्धकतावच्छेदकतावच्छेदकसम्बन्धघटकविषयतात्वसत्वात् । उक्तोभयवद्ह्रदे च नातिव्याप्तिः— वह्न्यभावव्याप्यव्याप्यवानिति प्रत्येकज्ञानीयविषयतायां जनकतावच्छेदिकायाः प्रतिबन्धकतावच्छेदकतावच्छेदकसम्बन्धघटकविषयतात्वाभावादिति वाच्यम् ॥१६॥ तथासति साध्याभावाभाववदवृत्तिमत्पक्षात्मकसत्प्रतिपक्षाव्याप्तेः तादृशसत्प्रतिपक्षज्ञानीयविषयतायां तादृशज्ञानीयज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतायाः स्वावच्छेदकतावच्छेदकसम्बन्धघटकविषयतात्वसम्बन्धेनाभावात् । ॥१७॥

नच स्वावच्छेदकत्वस्वावच्छेदकतावच्छेदकसंसर्गघटकविषयतात्वान्यतरसम्बन्धेनैव प्रतिबन्धकतायां जनकतावच्छेदकविषयतात्वव्यापकत्वविवक्षणान्नोभयविधसत्प्रतिपक्षाव्याप्तिः, नवोक्तोभयवद्ह्रदेऽतिव्याप्तिरिति वाच्यम् ॥ ॥१८॥ एवञ्च सति जलव्यापकवह्न्यभावकालीनजलवह्न्यभावव्याप्यव्याप्योभयवद्ह्रदे ऽतिव्याप्तेर्दुर्वारत्वात्, जलव्यापको वह्न्यभावः

R3447

जलवांश्च ह्रदः, वह्न्यभावव्याप्यव्याप्यव्यापको वह्न्यभावः वह्न्यभावव्याप्यव्याप्यवांश्च ह्रद इत्यनयोरुभयोर्निश्चययोरेकरूपेण प्रतिबन्धकत्वाङ्गीकारात्, निरुक्तज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायाः स्वावच्छेदकतावच्छेदकसम्बन्धघटकविषयतात्वसम्बन्धेन जनकतावच्छेदिकायां प्रत्येकज्ञानीयविषयतायामपि सत्वेन निरुक्तान्यतरसम्बन्धेन निरुक्तविषयतात्वव्यापकप्रतिबन्धकतायाः निरुक्तोभयवद्ह्रदविषयतात्वव्यापकत्वात् । ॥१९॥

नच यद्रूपावच्छिन्नविषयतायां प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षविषयताविशिष्टान्यत्वज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वोभयाभाववत्त्वं निवेश्यते । वैशिष्ट्यञ्च— निरूपितत्वतादात्म्यान्यतरसम्बन्धेन, अतो नानुपदोक्त उभयवद्ह्रदेऽतिव्याप्तिः, तद्विषयतायां निरुक्तोभयसत्त्वादिति वाच्यम् ॥२०॥ साध्याभावाभाववद्वृत्ति मत्पक्षरूप सत्प्रतिपक्षाव्याप्तेः, ह्रदो वह्निधूमोभयवानित्यादौ वह्न्यभावाभाववदवृत्तिमान् धूमाभाववान् वह्न्यभावाभाववदवृत्तिमांश्च ह्रद इति ज्ञानयोरेकविशिष्टापरत्वेन प्रतिबन्धकतया वह्न्यभावाभाववदवृत्तिमद्ह्रदविषयतायां निरुक्तोभयाभावासत्त्वात् । ॥२१॥

नच प्रतिहेतुव्यापकसाध्याभावत्वावच्छिन्नविषयताशालिनिश्चयवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वनिरुक्तविषयताविशिष्टान्यत्व उभयाभावनिवेशान्न दोष इति वाच्यम् ॥२२॥ वह्न्यभावाभाववदवृत्तिव्यापको धूमाभाव इति निश्चयवैशिष्ट्यावच्छिन्नायाः वह्न्यभावाभाववदवृत्तिमान् पक्ष इति निश्चयनिष्ठायाः प्रतिबन्धकताया अवच्छेदकत्वस्य निरुक्तविषयताविशिष्टान्यत्वस्य च उक्तसत्प्रतिपक्षविषयतायां सत्वात् तत्राव्याप्तेर्दुर्वारत्वात् ॥२३॥

नच— यद्धर्मावच्छिन्नप्रतिबध्यतासत्यन्तार्थः तद्धर्मावच्छिन्नप्रतिबध्यता निरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वघटितोभयाभावस्यैव यद्रूपावच्छिन्नविषयतायां निवेशान्नोक्ताव्याप्तिः — निरुक्तसत्प्रतिपक्षविषयतायाः वह्निमत्तानुद्धित्वावच्छिन्नप्रतिबध्यताघटितसत्यन्तार्थत्वेन तद्धर्मावच्छिन्नप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वघटितोभयाभाववत्त्व -

स्याक्षतत्वादिति वाच्यम् ॥२४॥ वह्न्यभावाभाववदवृत्तित्वव्यापको वह्न्यभाव इति निश्चयवैशिष्ट्यावच्छिन्नाया वह्न्यभावाभाववदवृत्तिमान् ह्रद इति ज्ञाननिष्ठायाः प्रतिबन्धकतायाः अवच्छेदकत्वस्य उक्तविषयतायां सत्त्वेनोक्तोभयाभावत्वस्य तत्राभावेन उक्ताव्याप्तेर्दुर्वारत्वात् । ॥२५॥

नच वह्न्यभावाभाववदवृत्तिमान् ह्रद इति निश्चयस्य ह्रदे वह्निमत्ता बुद्धिं प्रति ज्ञानवैशिष्ट्यानवच्छिन्नावश्यकल्पनीयप्रतिबन्धकतयैवोपपत्तौ ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतान्तरे मानाभावेन तद्धर्मावच्छिन्नप्रतिबध्यतानिरूपितोभयाभावस्य उक्तसत्प्रतिपक्षविषयतायां सत्त्वेन नोक्ताव्याप्तिरिति वाच्यम् ॥२६॥ धूमाभावाभाववदवृत्तिव्यापको वह्न्यभावः धूमाभावाभाववदवृत्तिमांश्च पक्षः, घटाभावाभाववदवृत्तिव्यापको वह्न्यभावः घटाभावाभाववदवृत्तिमांश्च पक्ष इत्यादि सकलनिश्चयसाधारण्येनोक्तरीत्या वह्न्यभावत्वावच्छिन्नविशेष्यतानिरूपितविशिष्टनिश्चयत्वेनैव प्रतिबन्धकतायाः वक्तव्यतया जलव्यापकवह्न्यभावकालीनेत्याद्युभयवद्ह्रदेऽतिव्याप्तिवारणाय विशेष्यतावैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वघटितोभयाभावत्वस्य विवक्षणीयतया तादृशप्रतिबन्धकतावच्छेदकत्वस्य उक्तसत्प्रतिपक्षविषयतायां सत्त्वेनोक्ताव्याप्तेर्दुर्वारत्वात् ॥२७॥

नचोभयाभावप्रतियोगिकोटावनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्यैव निवेशान्नोक्ताव्याप्तिः, प्रत्येकज्ञानीयवह्न्यभावाभाववदवृत्तिमद्ह्रदविषयतायाः उक्तप्रतिबन्धकतातिरिक्तवृत्तित्वेनोक्तोभयाभावत्वस्यासिद्धत्वात् । जलव्यापकेत्याद्युभयवद्ह्रदेच नातिव्याप्तिः, तद्विषयतायां निरुक्तप्रतिबन्धकतानतिरिक्तवृत्तित्वस्य निरुक्तविषयतावैशिष्ट्यान्यत्वस्य च द्वयोरेव सत्त्वेनोक्तोभयाभावत्वस्यासिद्धेरिति वाच्यम् ॥२८॥ अभावः प्रतियोगितासम्बन्धेन घटत्वव्यापकघटत्ववद्भेदकालीनघटत्ववानित्यत्र घटत्वव्यापकघटत्ववद्भेदकालीनघटत्वाभाववदवृत्तिमदभावरूपसत्प्रतिपक्षेऽव्याप्तेः, तत्र हि प्रतियोगितासम्बन्धेन घटत्वव्यापकस्समवायेन घटत्ववद्भेदः प्रतियोगितासम्बन्धेन घटत्ववांश्च भाव इति निश्चययोरेकविशिष्टापरत्वेनाभावत्वावच्छेदेन तादृशघटत्ववत्ताबुद्धिं प्रति प्रतिबन्धकतया तादृशप्रतिबन्धकतायाश्च प्रतिहेतुव्यापकताविशिष्टसाध्याभावनिश्चयवैशिष्ट्यावच्छिन्नतया उक्तसत्प्रतिपक्षविषयतायाः निरुक्तप्रतिबन्धकतावच्छेदकत्वनिरुक्तविषयतावैशिष्ट्यान्यत्वोभयवत्त्वात् ॥२९॥

नच निरुक्तविशिष्टस्य सत्प्रतिपक्षरूपता न स्वीक्रियते । तस्य बाधघटितत्वेन तद्घटकस्यैव तत्कार्यकारित्वादिति वाच्यम् ॥३०॥

अभावविशिष्टव्यापकसामान्यत्वाभावकालीनसामान्यत्वसाध्यकघटादिपक्षकस्थले समवायसम्बन्धस्य व्याप्यतावटकत्वे अभावविशिष्टव्यापकसामान्यत्वाभावकालीनसामान्यत्वाभावाभाववद्वृत्तिमद्घटरूपसत्प्रतिपक्षे ऽव्याप्तेः, तत्र हि अभावविशिष्टव्यापकस्सामान्यत्वाभावः अभावविशिष्टवांश्च घट इति ज्ञानस्यैकविशिष्टापरत्वेन प्रतिबन्धकतया निरुक्तसत्प्रतिपक्षविषयतायां निरुक्तप्रतिबन्धकतानतिरिक्तवृत्तित्वनिरुक्तविषयताविशिष्टान्यत्वोभयवत्त्वात्, व्यापकताघटितस्येवास्यापि सत्प्रतिपक्षरूपतायां आवश्यकत्वात् ॥३१॥

नच प्रतिहेतुव्यापकत्वाविशिष्टसाध्यतावच्छेदकपर्याप्तावच्छेदकताकप्रतियोगिताकाभावत्वावच्छिन्नविषयताशालि निश्चयवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वस्योभयाभावप्रतियोगितया निवेशान्नाव्याप्तिरिति वाच्यम् ॥ ३२ ॥

नत्रैव पृथिवीत्वव्यापकसामान्यत्वाभावकालीनपृथिवीत्वसामान्यत्वाभावव्याप्यव्याप्योभयवद्घटादावतिव्याप्तेः, तद्विषयतायाः प्रतिहेतुव्यापकताविशिष्टसाध्यतावच्छेदकपर्याप्तावच्छेदकताक प्रतियोगिताकाभावत्वावच्छिन्नविषयताशालिनिश्चयवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वविरहेण निरुक्तोभयाभाववत्त्वात् । अतः प्रतिहेतुव्यापकसाध्यतावच्छेदकावच्छिन्नाभावत्वावच्छिन्नविषयताशालिनिश्चयवैशिष्ट्यावच्छिन्न प्रतिबन्धकतावच्छेदकत्वस्य उभयाभावप्रतियोगितया निवेशनीयतयोक्ताव्याप्तितादवस्थ्यात्, उक्तोभयाभाववत्त्वस्य यद्रूपावच्छिन्नविषयतायां निवेशासम्भवेन जलव्यापकेत्युक्तोभयवद्ह्रदेऽतिव्याप्तेर्दुर्वारतयाऽवच्छेदककोटिप्रविष्टानामवच्छेदकत्वाङ्गीकारे च व्यापकताघटितसत्प्रतिपक्षमात्रेऽव्याप्तिसम्भवेन निरुक्तपरिष्कारासम्भवेन वह्न्यभाववद्वह्न्यभावव्याप्यव्याप्योभयवद्ह्रदेऽतिव्याप्तिर्दुर्वारा । ॥३३॥

नच विरोध्यनुमितिनिरूपितयत्किञ्चिज्जनकताव्यापकत्वं सत्यन्तघटकप्रतिबन्धकतायां निवेश्यम् , तथाच स्वनिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावत्त्वस्वविशिष्टप्रतिबन्धकत्वावत्त्व– एत-

दुभयसम्बन्धस्यैव पूर्वोक्तभेदप्रतियोगितावच्छेदकतावच्छेदकत्वात् । स्वविशिष्टत्वञ्च– स्वनिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकताविशिष्टत्वस्वावच्छेदकावच्छिन्नप्रतिबध्यता निरूपितत्वोभयसम्बन्धेन । जनकतावैशिष्ट्यं च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन । अवच्छेदकता च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्ना । विशेष्यदळन्तु जलव्यापकवह्न्यभावकालीनजलवद्ध्रदे ऽतिव्याप्तिवारणाय । तथाच वह्न्यभाववह्न्यभावव्याप्यव्याप्योभयवद्ध्रदे नातिव्याप्तिः, तत्र बाधप्रतिबन्धकतायास्तज्ज्ञाननिष्ठजनकताव्यापकत्वाभावादिति वाच्यम् ॥३४॥

ह्रदो वह्निमानित्यत्रैव जलव्यापकवह्न्यभावकालीनजलवह्न्यभावव्याप्यव्याप्योभयवद्ध्रदे ऽतिव्याप्तेः, तज्ज्ञानानिष्ठज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायाः सत्प्रतिपक्षज्ञानीयजनकताव्यापकत्वात् । निरुक्तोभयवद्ध्रदविषयतायाः तदवच्छेदकत्वविरोध्यनुमितिजनकतावच्छेदकत्वोभयवत्त्वात् ॥३५॥

नच यज्जनकताव्यापकत्वं प्रतिबन्धकतायाः तज्जनकतावच्छेदकत्वविवक्षणान्नातिव्याप्तिः, नच यत्त्वतत्त्वनिवेशादननुगम इति वाच्यम् । स्वनिरूपितप्रतिबन्धकतावत्त्वस्वविशिष्टजनकतावत्त्वैतदुभयसम्बन्धस्यैव उक्तभेदप्रतियोगितावच्छेदकत्वघटकत्वात् । स्ववैशिष्ट्यंच स्वनिरूपितप्रतिबन्धकतावृत्तित्वस्वावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितत्वोभयसम्बन्धेन । प्रतिबन्धकतावृत्तित्वं च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन । ,स्वनिष्ठावच्छेदकता स्वसमानाधिकरणभेद प्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्ना । तथाच नोक्तोभयवद्ध्रदे ऽतिव्याप्तिः, तज्ज्ञानीयविषयताया निरुक्तज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावृत्तिजनकतावच्छेदकत्वविरहादिति वाच्यम् ॥३६॥ जलं वृत्तित्वाभाववदित्यत्र जलव्यापकवृत्तित्वव्याप्यसमानाधिकरणजलवज्जले ऽतिव्याप्तेः, सत्प्रतिपक्षोन्नायकज्ञानीयजनकताव्यापकत्वस्य तत्स्थलीयबाधज्ञानप्रतिबन्धकतायां सत्त्वेन तादृशप्रतिबन्धकत्वजनकत्वोभयावच्छेदकत्वस्य निरुक्तविशिष्टविषयतायां सत्त्वात् ॥३७॥

नच जलव्यापकवृत्तित्वव्याप्यसमानाधिकरणजलवज्जलम्, शैवालव्यापकवृत्तित्वव्याप्यसमानाधिकरणशैवालवज्जलमित्यादिसकलनिश्चयसाधारण्येन जनकतायां लाघवानुरोधेन स्वीकरणीयतया तादृशजनकताव्यापकत्वस्य उक्तस्थलीयबाधप्रतिबन्धकतायामसत्त्वेन नोक्तातिव्याप्तिरिति वाच्यम् ॥३८॥ वृत्तित्वं तादात्म्यसम्बन्धावच्छिन्नत्वाभाववदित्यत्र तादात्म्यसम्बन्धेन तद्व्यक्तिव्यापकतादात्म्यसम्बन्धावच्छिन्नत्वव्याप्यवन्निरूपितादात्म्यसम्बन्धावच्छिन्नवृत्तितावत्तद्व्यक्तिमद्वृत्तित्वरूपे सत्प्रतिपक्षज्ञानायके ऽतिव्याप्तेः, अनुगतरूपेण जनकत्वाङ्गीकारेऽपि सम्बन्धभेदेन जनकतायाः भिन्नतया तादात्म्यसम्बन्धावच्छिन्नवृत्तित्वविषयताघटिततद्धर्मावच्छिन्नजनकताव्यापकत्वस्य उक्तस्थलीयबाधज्ञानप्रतिबन्धकतायां सत्त्वात् ॥३९॥

नच प्रतिबन्धकतानिरूपितानतिरिक्तवृत्तित्वस्वरूपसम्बन्धरूपोभयविधावच्छेदकत्वस्य यद्रूपावच्छिन्नविषयतायां निवेशान्नोक्तातिव्याप्तिः, निरुक्तसत्प्रतिपक्षज्ञानायकविषयतायां बाधज्ञानप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वविरहात् । नचैकत्र द्वयमिति रीत्या साध्याभावतद्व्याप्यव्याप्योभयावगाहिज्ञानीयविषयतायाः प्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वात् तत्रातिव्याप्तिर्दुर्वारैवेति वाच्यम् । यद्रूपावच्छिन्नविषयतासामान्ये उक्तप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वविवक्षणेनोक्तातिव्याप्तिवारणादिति वाच्यम् ॥४०॥ तथापि तादृशस्थले साध्याभावसाध्याभावव्याप्यव्याप्योभयवद्ध्रदेऽतिव्याप्तेर्दुर्वारत्वात् । तद्विषयतासामान्यस्यैवोक्तप्रतिबन्धकतानतिरिक्तवृत्तित्वस्वरूपसम्बन्धरूपोभयविधावच्छेदकत्वबत्त्वात् । उक्तरीत्या निरुक्तविशिष्टान्तरघटितत्वस्यापि सत्त्वात् ॥४१॥

नच स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयत्किञ्चिद्रूपावच्छिन्नविषयकत्वाव्यापकत्वस्य जनकतायां निवेशान्नोक्तातिव्याप्तयः, स्वावच्छिन्नाविषयकप्रतीतिविषयताबच्छेदकसाध्याभावव्याप्यव्याप्यवत्पक्षतावच्छेदकावच्छिन्नाविषयकत्वाव्यापकत्वस्य निरुक्तविशिष्टविषयताव्यापकजनकतायामभावादिति वाच्यम्।४२। सत्प्रतिपक्षज्ञानस्यानुगतरूपेण साध्याभावानुमितिजनकत्वस्वीकारेण व्यापकताघटितसत्प्रतिपक्षमात्रे ऽव्याप्तेः , स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकी

भूतशैवालव्यापकवह्न्यभावसमानाधिकरणशैवालवद्ह्रदत्वाद्यवच्छिन्नविषयत्वाव्यापकत्वस्य जलव्यापकवह्न्यभावसमानाधिकरणजलवद्ह्रदविषयकनिश्चयीयजनकतावच्छेदकधर्मसत्त्वात् ॥४३॥

नच स्वावच्छिन्नविषयकत्वाव्यापकविषयताशून्यज्ञानीयविशिष्टान्तरविषयत्वाव्यापकत्वस्य विशेष्यनुमितिजनकतायां निवेशान्नोक्ताऽव्याप्तिः, शैवालव्यापकवह्न्यभावसमानाधिकरणशैवालवद्ह्रदविषयतायां जलव्यापकवह्न्यभावसमानाधिकरणजलवद्ह्रदत्वावच्छिन्नविषयिकस्वाव्यापकविषयताशून्यज्ञानीयत्वाभावादिति वाच्यम् ॥४४॥ वह्न्यभावव्यापकं यज्जलव्यापकवह्न्यभावसमानाधिकरणजलं तत्समानाधिकरणवह्न्यभाववद्ह्रदात्मके सत्प्रतिपक्षोन्नायकेऽतिव्याप्तेर्दुर्वारत्वात्, तज्ज्ञानीयजनकतायां निरुक्तविशेषणाक्रान्तविशिष्टान्तरविषयित्वाव्यापकत्वात्, उक्तविशिष्टविषयितायां बाधज्ञानीयप्रतिबन्धकतावच्छेदकत्वाच्च ॥४५॥

नच स्वावच्छिन्ननिरूपितविशिष्टविषयित्वाव्यापकप्रकृतानुमितिप्रतिबन्धकत्वस्य सत्यन्तार्थतया नोक्तातिव्याप्तिः, बाधज्ञानीयप्रतिबन्धकतायां निरुक्तविशिष्टानिरूपितवह्न्यभाववद्ह्रदत्वावच्छिन्नविषयताव्यापकतया तदव्यापकप्रकृतानुमितिप्रतिबन्धकतायां अप्रसिद्धत्वात् । नापि निरुक्तोभयवद्ह्रदादावतिव्याप्तिः, तत्र स्वावच्छिन्ननिरूपितविशिष्टविषयित्वाव्यापकप्रकृतानुमितिप्रतिबन्धकतायां अप्रसिद्धत्वादिति वा वाच्यम् ॥४६॥ व्यापकताघटितसत्प्रतिपक्षमात्रेऽव्याप्तेः, प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षविषयकनिश्चयीयप्रतिबन्धकतायास्तादृशविशिष्टानिरूपितप्रतिहेतुव्यापकसाध्याभावसमानकालीनप्रतिहेतुमत्पक्षविषयितायाव्यापकत्वेन विशिष्टान्तरविषयित्वाव्यापकप्रकृतानुमितिप्रतिबन्धकतायां अप्रसिद्धेः । ॥४७॥

नच स्वावच्छिन्नविषयकत्वाव्यापकविषयताशून्यज्ञानीयत्वस्य विशिष्टान्तरविषयितायां निवेशान्नाव्याप्तिः, प्रतिहेतुव्यापकसाध्याभावसमानकालीनप्रतिहेतुमत्पक्षविषयितायाः प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षविषयित्वाव्यापकविषयिताशून्यज्ञानीयत्वाभावादिति वाच्यम्४८ घटो गगनाभाववदभाववत्कालीनगगनवानित्यादौ अभावव्यापकगगनाभाववदभाववत्कालीनगगनाभावसमा

नाधिकरणाभाववद्घटरूपसत्प्रतिपक्षेव्याप्तेः, तत्र निरुक्तसत्प्रतिपक्षविषयकज्ञानदशा यामनुमित्यनुत्पादस्य अभाववान् गगनाभाववान् अभाववांश्च घट इति निश्चययो रेकविशिष्टापरत्वेन प्रतिबन्धकतयैवोपपत्तेः प्रतिबन्धकतान्तरे मानाभावात्तादृश प्रतिबन्धकतायाश्च निरुक्तसत्प्रतिपक्षानिरूपिततद्विषयकत्वाव्यापकविषयताशून्य ज्ञानीयगगनाभाववदभाववत्कालीनगगनाभावसमानाधिकरणाभाववद्घटविषयिता व्यापकत्वेन तादृशविषयित्वाव्यापकप्रतिबन्धकतावच्छेदकत्वस्य निरुक्तसत्प्रति पक्षविषयतायामभावात् ॥४९॥

नच तस्य सत्प्रतिक्षता नाङ्गीक्रियते, सामान्यलक्षणाक्रान्तत्वात् । तथा हि, प्रतिबन्धकताघटितलक्षणे स्वावच्छिन्ननिरूपितविशिष्टविषयित्वाव्यापकप्रति बन्धकतावच्छेदकस्वावच्छिन्नविषयताकत्वस्यैव निष्कृष्टविशिष्टान्तराघटितत्वरूप तया तस्य चोक्तरीत्या उक्तविशिष्टेऽभावात्, अत्र वदन्तीत्यादिकल्पीयस्य विशिष्टान्तरविषयित्वाप्रयोज्येत्यादिनिष्कृष्टविशिष्टान्तराघटितत्वस्याप्यवश्यसम्भवात्, न सामान्यलक्षणाक्रान्ततोक्तविशिष्टस्य । यदिचाभावव्यापको निरुक्तसाध्या भावः अभाववांश्च घटः, प्रमेयत्वव्यापकस्तादृशसाध्याभावः प्रमेयत्ववांश्च घटः इत्यादिनिखिलनिश्चयानामेकरूपेण प्रतिबन्धकत्वस्वीकारात्सामान्यलक्षणाक्रान्तत्व मुक्तविशिष्टस्य सम्भवत्येव, उक्तानुगतप्रतिबन्धकतायाश्च अभाववान् गगना भाववान् अभाववांश्च घट इति ज्ञानयोरेकविशिष्टापरत्वेन प्रतिबन्धकत्वाङ्गी कारेपि प्रमेयत्वव्यापकस्तादृशसाध्याभावः, प्रमेयत्ववांश्च घट इति निश्चयादनुमिति प्रतिबन्धानुरोधेन अवश्यकल्पनीयतया तामादायैव प्रतिबन्धकताघटितलक्षण पक्षीयविशिष्टान्तराघटितत्वसम्भवात्, एवमत्र वदन्तीत्यादिकल्पीयविशिष्टान्तरा घटितत्वस्यापि तत्र सूपपादत्वादित्युच्यते; तदा निरुक्तसत्यन्तार्थस्यापि उक्त प्रतिबन्धकतामादायैवोपपादयितुं शक्यत्वेनोक्ताव्याप्तेस्सुदूरपराहतत्वात् । तस्मा न्निरुक्तलक्षणं निष्कृष्टमेवेति वाच्यम् ॥ ५० ॥ प्रतिबन्धकताघटितलक्षणे उक्त परिष्कारेणोक्तोभयवद्ध्रदादावव्याप्तिवारणेपि वह्न्यभाववान् ह्रदो वह्निमानि-त्यादौ वह्न्यभावव्याप्यवद्ध्रदादावव्याप्तिवारणार्थमवश्यं परिष्करणीये यद्रूपा वच्छिन्नविषयताशालिनिश्चयाव्यवहितोत्तरानुमितिसामान्ये पक्षे पक्षतावच्छेदक वैशिष्ट्यावगाहित्वाभावः विरोधिविषयिताप्रयुक्तः तद्रूपावच्छिन्नान्यत्वे सति

यद्रूपावच्छिन्नविषयताशालिनिश्चयाव्यवहितोत्तरानुमितिसामान्ये साध्यधर्मिकसाध्य तावच्छेदकवैशिष्ट्यावगाहित्वाभावः विरोधिविषयताप्रयुक्तः तद्रूपावच्छिन्नान्यत्वे च सति यद्रूपावच्छिन्नविषयताशालिनिश्चयाव्यवहितोत्तरानुमितिसामान्यनिष्ठः विरोधिविषयताप्रयुक्तः, पक्षे साध्यवैशिष्ट्यावगाहित्वाभावः तद्रूपावच्छिन्नत्वे सति यद्रूपावच्छिन्नविषयताशालिनिश्चयाव्यवहितोत्तरानुमित्यव्यापकः विरोधि विषयताप्रयुक्तः, पक्षे साध्यवैशिष्ट्यावगाहित्वाभावस्तद्रूपावच्छिन्ना या विषयता तदवच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यद्रूपावच्छिन्ना विषयता तद्रूपावच्छिन्नत्वमिति निष्कृष्टलक्षणे वह्न्यभाववह्न्यभावव्याप्यव्याप्योभयवद्भ्रदे ऽतिव्याप्तेर्दुर्वारत्वात्, तत्र सत्यन्तदळोन्नायकदळयोस्सत्त्वादिति चेत्? ॥४१॥

अत्र वदन्ति;— विशिष्टान्तरविषयित्वाप्रयोज्यस्वविषयिताप्रयोज्यपक्षधर्मिक साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताकत्वनिवेशान्नोक्तातिव्याप्तिः ।

नचैवं सत्यन्तदळवैयर्थ्यम्, वह्न्यभावव्याप्यव्याप्यवान् वह्न्यभाववान् वह्न्य भावव्याप्यव्याप्यवांश्च ह्रद इति ज्ञानयोरेकविशिष्टापरत्वेन प्रतिबन्धकतया वह्न्यभावव्याप्यव्याप्यवद्भ्रदविषयतायाः पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभा-वाधिकरणताप्रयोजकतया तत्रातिव्याप्तिवारकतया तत्सार्थक्यात् ।

नच तद्विषयताप्रयोज्यायामुक्ताधिकरणतायां विशिष्टान्तरविषयित्वाप्रयो ज्यत्वासम्भव इति वाच्यम्, वक्ष्यमाणरीत्या विशिष्टान्तरे तादृशत्वनिवेश स्यावश्यकत्वात् ॥ ५२ ॥

नच विशिष्टान्तरविषयित्वाप्रयोज्यत्वमात्रनिवेशेऽसम्भवः । यद्रूपावच्छिन्न विषयताशालिनिश्चयोत्तरानुमितिसामान्ये पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वा भावः विरोधिविषयिताप्रयुक्तः तद्रूपावच्छिन्नविशिष्टान्तराघटितत्वनिवेशेऽपि बाधघटितसत्प्रतिपक्षेऽव्याप्तिः । पक्षसाध्यवैशिष्ट्यग्रहविरोध्युन्नायकत्वमात्रनिवेशे च वह्न्यभावव्याप्यवह्न्यभावव्याप्यवद्भ्रदेऽव्याप्तिः । अतो निरुक्तसत्प्रतिपक्ष लक्षणाश्रयरूपतादृशविशिष्टान्तरस्यैव निवेशनीयतया निरुक्तोभयवद्भ्रदे अति व्याप्तिरिति वाच्यम् ॥५३॥ निरुक्तसत्यन्तमात्राश्रयत्वस्यैव विशिष्टान्तरे निवेशा दुन्नायकत्वदळस्य तत्रानिवेशेन तत्रातिव्याप्तिविरहात् । बाधघटितसत्प्रतिपक्षे ऽव्याप्तिवारणाय च विशिष्टान्तरविषयितानिष्ठप्रयोजकतायां स्वप्रयोज्याधि

करणतानिष्ठभेदप्रतियोगितानवच्छेदकत्वस्वानवच्छेदकावच्छिन्नत्वोभयसम्बन्धेन प्रयोजकताविशिष्टान्यत्वनिवेशात् । भेदप्रतियोगितावच्छेदकता च स्वनिरूपित प्रयोज्यतावत्त्वसम्बन्धेन , बाधविषयतानिष्ठप्रयोजकतायाश्च निरुक्तोभयसम्बन्धेन, सत्प्रतिपक्षविषयतानिष्ठप्रयोजकताविशिष्टत्वेन बाधघटितसत्प्रतिपक्षेऽव्याप्ति विरहात्

॥५४॥

नच– वह्न्यभावव्याप्यव्याप्यजलव्यापकवह्न्यभावकालीनजलाभाववह्न्युभयवानित्यादौ तादृशजलवद्ध्रदरूपबाधेऽतिव्याप्तिः, विशिष्टान्तरभूतजलव्यापकवह्न्यभावकालीनजलवद्ध्रदविषयितानिष्ठप्रयोजकतायां निरुक्तोभयसम्बन्धेन बाधविषयतानिष्ठप्रयोजकताविशिष्टत्वात् , तदन्यविशिष्टान्तरविषयतानिष्ठप्रयोजकतानिरूपितप्रयोज्यताशून्यस्वविषयताप्रयोज्योक्ताभावाधिकरणताकत्वात् । अतो विषयितानिष्ठप्रयोजकतायामुक्तविशेषणदानासम्भवे नोक्तातिव्याप्तिर्दुर्वारैवेति चाच्यम् ॥ ५५ ॥ उक्तविशेषणदानेपि वह्न्यभावव्याप्यव्याप्याभाववह्न्युभयवानित्यत्र वह्न्यभावव्याप्यव्याप्यवद्ध्रदेऽतिव्याप्तेर्दुर्वारतया यद्रूपावच्छिन्नविषयताशालिनिश्चयाव्यवहितोत्तरानुमितिसामान्ये विरोधिविषयता प्रयोज्यतावच्छेदकयद्रूपविशिष्टः पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावः तद्रूपावच्छिन्नत्वे सति, यद्रूपावच्छिन्नविषयताशालिनिश्चयाव्यवहितोत्तरानुमितिसामान्ये विरोधिविषयताप्रयोज्यतावच्छेदकतद्रूपविशिष्टः पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावः तद्रूपावच्छिन्नविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यद्रूपावच्छिन्नविषयता तद्रूपावच्छिन्नत्वस्यैव विवक्षणीयतया पूर्वोक्तबाधेऽतिव्याप्त्यनवकाशात् । नचाननुगमः । स्ववृत्तित्वस्ववृत्तिरूपावच्छिन्नविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावृत्तित्वोभयसम्बन्धेन विरोधिविषयताप्रयोज्यतावच्छेदकरूपविशिष्टरूपवत्त्वस्यैव लक्षणत्वसम्भवात् । प्रथमस्ववृत्तित्वञ्च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन । स्वनिष्ठावच्छेदकता स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्ना । स्वाधिकरणता च स्वावच्छिन्नविषयताशालिनिश्चयाव्यवहितोत्तरानुमितित्वसम्बन्धेन । भेदप्रतियोगितावच्छेदकता च स्वविशिष्टविरोधिविषयताप्रयुक्तत्वविशिष्टपक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतावत्त्वसम्बन्धेन । जनकतावृत्तित्वंच स्वावच्छिन्नविषयत्वव्यापकत्वसम्बन्धेन । द्वितीयवृत्तित्वमप्यनेनैव सम्बन्धेन ॥५६॥

नचोक्तविशेषणदाने ह्रदो वह्निधूमोभयवानित्यादौ जलव्यापकवह्न्य भावसमानाधिकरणजलव्यापकधूमाभावसमानाधिकरणतादृशजलवद्ह्रदात्मकसत्प्रति पक्षघटके सत्प्रतिपक्षे मेयत्वविशिष्टेऽतिव्याप्तिः, विशिष्टान्तरभूतावान्तरसत्प्रति पक्षविषयितानिष्ठप्रयोजकतायामुक्तोभयसम्बन्धेन महासत्प्रतिपक्षविषयितानिष्ठप्रयो जकताविशिष्टत्वादिति वाच्यम् ॥५७॥ स्वविषयतात्वव्यापकरूपावच्छिन्नप्रयोजकता विशिष्टान्यत्वस्यैव विशिष्टान्तरविषयतानिष्ठप्रयोजकतायां निवेशनीयत्वान्महा सत्प्रतिपक्षविषयितानिष्ठप्रयोजकतायां मेयत्वविशिष्टावान्तरसत्प्रतिपक्षविषयितात्व व्यापकरूपानवच्छिन्नतया निरुक्तप्रयोजकताविशिष्टान्यत्वस्य विशिष्टान्तरभूतनिरु क्तावान्तरसत्प्रतिपक्षविषयितानिष्ठप्रयोजकतायामक्षतत्वेन मेयत्वविशिष्टे तत्राति व्याप्तिविरहात् ॥५८॥

नच ह्रदो वह्निमान् धूमादित्यत्र ह्रदवृत्तिवह्निव्यापकीभूताभावप्रतियोगि जले मेयत्वविशिष्टेऽतिव्याप्तिः, तत्र वह्निव्यापकीभूताभावप्रतियोगिजलं ह्रदवृत्ति जन्यमिति ज्ञानयोः परस्परविशिष्टत्वेन प्रतिबन्धकताद्वयस्य स्वीकरणीयतया तथैव विनिगमनाविरहेण प्रयोजकताद्वयस्यापि परस्परानवच्छेदकावच्छिन्नस्य स्वीकरणीयतया द्वयोरपि प्रयोजकतयोः निरुक्तोभयसम्बन्धेन परस्परविशिष्ट तया प्रयोजकताविशिष्टान्यविशिष्टान्तरविषयितानिष्ठप्रयोजकतानिरूपितप्रयोज्यता शून्यत्वस्य स्वविषयताप्रयोज्यपक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरण-तायामक्षतत्वात् । स्वविषयतानिष्ठप्रयोजकतायामपि निरुक्तसम्बन्धेन प्रयोज-कताविशिष्टान्यत्वस्य निवेशे च तत्रैव लक्ष्यभूते ह्रदवृत्तिवह्निव्यापकीभूता-भावप्रतियोगिजलेऽव्याप्तिरिति वाच्यम् ॥५९॥ स्वप्रयोज्यत्वाभावसमानाधि करणप्रयोज्यत्वनिरूपितत्वस्यापि निरुक्तप्रयोजकतावैशिष्ट्यघटकतया निवेशात् । उक्तस्थले चोक्तप्रयोजकताद्वयस्यापि परस्परनिरूपितप्रयोज्यत्वाभावसमानाधि करणप्रयोज्यत्वानिरूपितत्वेन निरुक्तप्रयोजकताविशिष्टान्यत्वस्याक्षततया उक्ताति व्याप्तयनवकाशात् ॥६०॥

नच विशिष्टान्तरे जनकत्वप्रयोजकत्वोभयघटिततादृशत्वानिवेशे व्यापकता घटितसत्प्रतिपक्षमात्रेऽव्याप्तिः । प्रतिहेतुव्यापकसाध्याभावसमानकालीनप्रतिहेतु मत्पक्षस्यापि विशिष्टान्तरत्वसम्भवेन तद्विषयताप्रयोज्यत्वस्य सत्प्रतिपक्षविषयता

प्रयोज्योक्तोभयाभावाधिकरणतायां सत्त्वात्, अतस्तादृशत्वनिवेशनमावश्यकमिति वह्न्यभावेत्युक्तोभयवद्ध्रदेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम् ॥६१॥ तादृशत्वनिवेशेपि वह्न्यभावव्याप्यव्याप्यजलव्यापक वह्न्यभावकालीनजलवद्ध्रदस्य विशिष्टान्तरत्वमादायोक्ताव्याप्तेरावश्यकतया विशिष्टान्तरे तादृशत्वमनिवेश्यविशिष्टान्तर विषयतायां प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुविषयतावैशिष्ट्यान्यत्व प्रतिहेतुव्यापकताविशिष्टसाध्याभावविषयकनिश्चयवैशिष्ट्यघटितधर्मावच्छिन्नप्रयोजकतावत्त्वोभयाभाववत्त्वं निवेश्यैवोक्ताव्याप्तिर्वारणीयतयोक्तातिव्याप्तिवारणसम्भवात् ॥६२॥

नचैवमपि वह्न्यभावव्याप्यव्याप्यजलव्यापकवह्न्यभावकालीनजलोभयवद्ध्रदेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम् ॥६३॥ तत्र प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षविषयतायां निरुक्तोभयाभावसत्त्वेन तत्प्रयोज्यत्वस्य निरुक्तविशिष्टविषयताप्रयोज्याधिकरणतायामक्षतत्वेनोक्तातिव्याप्त्यनवकाशात्॥६४॥

नच स्वपूर्ववृत्तिप्रतिबन्धकज्ञानीयप्रतिबन्धकतावच्छेदकविषयतायाः एव स्वनिष्ठप्रतिबध्यतावच्छेदकाभावप्रयोजकतया निरुक्तोभयवद्ध्रदविषयकनिश्चयाव्यवहितोत्तरानुमितिनिष्ठपक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां व्यापकतः घटितसत्प्रतिपक्षाविषयतायाः प्रयोजकत्वासम्भवे नोक्तातिव्याप्तिर्दुर्वारैवेति वाच्यम् ॥६५॥ प्रतिबन्धकतायाः प्रतिबन्धकतावच्छेदकतामेदेनेव प्रयोजकतायाः अपि प्रयोजकतावच्छेदकतामेदेन भेदः; तद्भेदश्च क्वचित्प्रयोजकतावच्छेदकभेदात् क्वचित्प्रयोजकतावच्छेदकतावच्छेदकभेदात्, प्रकृते च निरूप्यनिरूपकभावापन्नविषयतात्वस्य प्रयोजकतावच्छेदकस्यैक्यात्प्रयोजकतायाः ऐक्यमिति जलव्यापकेत्याद्युक्तोभयवद्ध्रदेऽतिव्याप्तिविरहात् ॥६६॥

नच जलव्यापको वह्न्यभाव इति निश्चयविशिष्टयोः ह्रदे जलं जलवान् ह्रद इति निश्चययोरनुगतरूपेण प्रतिबन्धकतामते ह्रदवृत्तिप्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुविषयताया निरुक्तोभयाभाववद्विशिष्टान्तरविषयतात्वेन तदप्रयोज्यत्वस्य सत्प्रतिपक्षविषयताप्रयोज्याधिकरणतायामभावेन सत्प्रतिपक्षाव्याप्तिवारणाय स्वावच्छिन्नघटकतानवच्छेदकधर्मावच्छिन्नत्वप्रतिहतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुविषयताविशिष्टत्वोभयाभाववत्त्वस्यापि विशिष्टान्तरविषयतायामवश्यं निवेशनीयतया जलव्यापकेत्याद्युभयवद्ध्रदेतिव्याप्तिर्दुर्वारैवेति वाच्यम्॥

स्वविषयतायामपि प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुविषयता विशिष्टान्यत्वेत्युभयाभावस्य निवेशात्, निरुक्तोभयवद्ध्रदविषयतायां चोक्तो भयाभाववत्त्वविरहेणातिव्याप्तिविरहात् ॥६८॥

नचैवं सत्यभावविशिष्टव्यापकसामान्यत्वाभावकालीनसामान्यत्वसाध्यके तादृश साध्याभावाभाववदवृत्तिमत्पक्षरूपसत्प्रतिपक्षे पूर्वोक्तरीत्यातिव्याप्तिरिति निरुक्तोभया भाववत्त्वस्य स्वविषयतायां निवेशयितुमशक्यत्वेनोक्तातिव्याप्तिर्दुर्वारैवेति वा-च्यम् ॥ ६९ ॥ साध्याभावाभाववदवृत्तिविषयताविशिष्टान्यत्वघटितत्रितयाभाव वत्त्वस्य स्वविषयतायां निवेशादुक्तसत्प्रतिपक्षविषयतायां च तस्य सत्त्वेन लक्षण गमनसम्भवात्; निरुक्तोभयवद्ध्रदे च नातिव्याप्तिः, तद्विषयतायां निरुक्त त्रितयाभाववत्त्वाभावात् । ॥७०॥

नचैवं सत्युक्ताभावप्रतियोगिकोटौ प्रतिहेतुव्यापकताविशिष्टसाध्याभाव निश्चयवैशिष्ट्यघटितधर्मावच्छिन्नप्रयोजकतावत्त्वस्य निवेशे प्रयोजनाभावात्, प्रति हेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुविषयितात्राविशिष्टान्यत्वसाध्याभावाभाववद्वृत्तिविषयताविशिष्टान्यत्वोभयाभाववत्त्वावच्छिन्नविषयतेत्याद्यक्तविशेषणेनैवोन्नाय कवारणे सत्यन्तवैयर्थ्यापत्त्या, उक्तपरिष्कारासम्भवेन सम्पूर्णसत्प्रतिपक्षाक्रान्तत्व रूपतादृशत्वस्यैव विशिष्टान्तरे निवेशनीयतयोक्तोभयवद्ध्रदेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम् ॥७१॥ विशिष्टान्तरे तादृशत्वमनिवेश्य विशिष्टान्तरविषयितायां स्वा-वच्छिन्नविषयकत्वाव्यापकविषयिताशून्यज्ञानीयत्वं निवेश्य कालीनत्वघटितपदार्थस्य वारणीयतयोक्तोभयवद्ध्रदेऽतिव्याप्त्यनवकाशात् । ॥७२॥

नच तादृशत्वानिवेशे व्यापकताघटितसत्प्रतिपक्षमात्रे अव्याप्तिः, तत्रोक्त विशेषणाक्रान्तजलवद्ध्रदविषयतात्रयोज्यत्वस्य सत्प्रतिपक्षविषयतात्रयोज्यपक्षधर्मिक साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां सत्वात्; तथाच विशिष्टान्तरे ता-दृशत्वस्यावश्यं निवेशनीयतयोक्तोभयवद्ध्रदेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम् ॥७३॥

स्वविषयताशालिनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकविरोधिविषयताप्रयुक्त पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताकत्वरूपसत्प्रतिपक्षैकदेशस्यैव वि-शिष्टान्तरे निवेशनीयतया उक्तातिव्याप्त्यव्याप्त्योरनवकाशात् । ॥ ७४ ॥

नच तथा निवेशे ह्रदो वह्निजलाभावोभयवानित्यादौ जलव्यापकवह्न्यभावसमानाधिकरणजलवद्भ्रदरूपे सत्प्रतिपक्षेऽव्याप्तिः, जलवद्भ्रदरूपविशिष्टान्तरस्य निरुक्तविशेषणाक्रान्तत्वात् ; अतः शेषदलस्यापि निवेशनीयतयोक्तोभयवद्भ्रदेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम् ॥७५॥

स्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकयत्किंचिद्रूपावच्छिन्नस्वावच्छिन्नविषयकत्वाव्यापकविषयताशून्यज्ञानीयविषयतात्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यताशून्यत्वस्य स्वविषयताप्रयोज्योक्ताधिकरणतायां निवेशेनोक्ताव्याप्त्यतिव्याप्त्योर्वारणात् ; तथाहि— सत्प्रतिपक्षविषयताप्रयोज्यपक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताप्रयोज्यतावच्छेदकं प्रतिहेतुव्यापकं साध्याभावनिश्चयप्रतिहेतुमत्पक्षविषयत्वनिश्चयत्वादिसमुदायत्वम्, तच्च न जलवद्भ्रदत्वावच्छिन्नविषयतात्वावच्छिन्नव्यापकतावच्छेदकम्, जलव्यापकवह्न्यभावसमानकालीनजलवद्भ्रदविषयता च न स्वावच्छिन्नविषयकत्वाव्यापकविषयताशून्यज्ञानीयेति नोक्तसत्प्रतिपक्षाव्याप्तिः । नवोक्तोभयवद्भ्रदेऽतिव्याप्तिः, तत्र वह्न्यभाववद्भ्रदविषयत्वनिश्चयत्वादिसमुदायत्वे वह्न्यभाववद्भ्रदत्वावच्छिन्नविषयतात्वावच्छिन्नव्यापकतावच्छेदकत्वसत्त्वात् ॥७६॥

नचैवं मेयत्वविशिष्टसत्प्रतिपक्षेऽतिव्याप्तिः, केवलसत्प्रतिपक्षविषयतात्वावच्छिन्नव्यापकतावच्छेदकत्वस्य निश्चयत्वादिघटितसमुदायत्वे अभावात् ; तादृशविषयतात्वावच्छिन्नव्यापकतावच्छेदककेवलविषयतात्वावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वाप्रसिद्ध्या सत्प्रतिपक्षाव्याप्तिवारणाय स्वावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वाभाववत्त्वसम्बन्धावच्छिन्नप्रतियोगिताकतादृशरूपाभाववत्त्वस्यैव निरुक्ताधिकरणतायां निवेशनीयत्वात् ; तथाचोक्तरीत्या निवेशो न सम्भवतीति वाच्यम्॥७७

अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टविशिष्टान्तरविषयतास्वावच्छिन्नव्यापकतावच्छेदकत्वस्यैव निवेशात् । निरुक्तसमुदायत्वे च निरुक्तरूपावच्छिन्नव्यापकतावच्छेदकत्वस्याव्याहतत्वादतिव्याप्तिविरहात् ॥७८॥

नच वह्निजलाभावोभयसाध्यके जलव्यापकतादृशोभयाभावसमानाधिकरणजलवद्भ्रदरूपे सत्प्रतिपक्षे अव्याप्तिः, तत्प्रयोज्यतायां पक्षधर्मिकनिरुक्तोभयवैशिष्ट्यावगाहित्वाभावाधिकरणतायां निरुक्तसत्प्रतिपक्षविषयतानिश्चयत्वादिपर्यन्तसमुदायत्वस्येव व्यापकाभावप्रयोजकस्येत्यादिरीत्या विशिष्टान्तरभूतजलवद्भ्रदविषयता

निश्चयत्वादिपर्याप्तसमुदायत्वस्यापि प्रयोजकतावच्छेदकतया निरुक्तरूपावच्छिन्न प्रयोजकतानिरूपितप्रयोज्यताशून्यस्वविषयताप्रयोज्योक्ताधिकरणताकत्वस्य तत्राभावात् ; अतो विरोध्युन्नायकत्वघटितताद्दशत्वमेव विशिष्टान्तरे निवेश्यमित्युक्तोभयवद्ध्रदादावतिव्याप्तिर्दुर्वारैवेति वाच्यम् ॥७९॥ ताद्दशत्वनिवेशेपि जलव्यापकह्रदत्वभावसमानाधिकरणजलव्यापकताद्दशोभयाभावसमानाधिकरणताद्दशजलवद्भेदरूपसत्प्रतिपक्षे अव्याप्तेर्दुर्वारतया प्रयोज्यतायां विशिष्टान्तरविषयतानिष्ठसाक्षात्प्रयोजकतानिरूपितत्वस्यावश्यं निवेशनीयतया निरुक्तसत्प्रतिपक्षाव्याप्तिविरहात्, निरुक्ताद्दशत्वानिवेशेनोक्तातिव्याप्तिविरहात् । साक्षात्प्रयोजकतानिरूपितत्वञ्च स्वनिरूपितप्रयोज्यतावदभावप्रतियोगितावच्छेदकावच्छिन्नव्याप्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावावृत्तित्वसहिततत्प्रयोजकतानिरूपितत्वम् । उक्तस्थले जलवद्भ्रदविषयतानिष्ठप्रयोजकतानिरूपितस्य ताद्दशस्योक्तोभयावगाहित्वाभावाधिकरणतायामसत्त्वेन तत्र लक्षणगमनसम्भवात् ॥८०॥

नचैवमसम्भवः, सर्वत्र तत्प्रयोजकतानिरूपितप्रयोज्यतायां स्वनिरूपितप्रयोज्यतावदभावप्रतियोगितावच्छेदकस्य स्वावच्छिन्नव्याप्यतावच्छेदकतया तदवच्छिन्नाभाववृत्तित्वसत्त्वेन तदवृत्तित्वसहिततन्निरूपितत्वस्याप्रसिद्धेः; अत उक्तपरिष्कारासम्भवेनोभयवद्ध्रदादावतिव्याप्तिर्दुर्वारैव । अनुपदोक्तसत्प्रतिपक्षघटितसत्प्रतिपक्षाव्याप्तिः विशेष्यदलघटकोन्नेयतावच्छेदकस्य एतद्दलप्रविष्टोन्नेयतावच्छेदकेन सह ऐक्यविवक्षया वारणीयेति वाच्यम् ॥८१॥

तद्वच्छिन्नव्याप्यतावच्छेदकत्वस्याधेयत्वस्वावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन तद्विशिष्टत्वरूपत्वात् । आधेयता च स्वावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन । ईदृशस्य स्वावच्छिन्नव्याप्यतावच्छेदकत्वस्य स्वव्यावृत्तत्वेनासम्भवविरहात्, उक्तपरिष्कारस्य निर्दुष्टतयोक्तोभयवद्ध्रदातिव्याप्तिविरहात् ॥८२॥

नच जलव्यापकेत्युक्तसत्प्रतिपक्षमेयत्वविशिष्टेऽतिव्याप्तिः, तत्र स्वविषयतानिष्ठप्रयोज्यायामुभयवैशिष्ट्याभावाधिकरणतायां निरुक्तस्य प्रयोज्यत्वस्याभावेन उक्त

विशिष्टान्तराघटितत्वसत्त्वात्, अतः पूर्वपरिष्कारं परित्यज्य तादृशत्वमेव शरणी करणीयमित्युक्तातिव्याप्तिर्दुर्वारैवेति वाच्यम् ॥८३॥

मेयत्वविशिष्टपूर्वोक्तसत्प्रतिपक्षे अतिव्याप्तिवारणाय स्वविषयतानिष्ठप्रयोजकतानिरूपितत्वस्याप्युक्तविशेषस्यैव निवेशात्तादृशत्वस्य सर्वथैवानिवेशेनोक्तोभय बद्ध्रदातिव्याप्तेर्दूरनिरस्तत्वात् ॥८४॥

नच स्वविषयतानिष्ठप्रयोजकतानिरूपितत्वस्यैतादृशस्य निवेशे उक्तोभय साध्यके जलव्यापकवह्न्यभावसमानाधिकरणजलवद्ध्रदरूपसत्प्रतिपक्षे अव्याप्तिः तत्र ह्रदधर्मिकोभयवैशिष्ट्यावगाहित्वाभावरूपपक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वा-भावाधिकरणतानिष्ठप्रयोज्यतायां पूर्वोक्तस्वविषयतानिष्ठप्रयोजकतानिरूपितत्वस्या भावात्; तथाचोक्तदिशातिव्याप्तिर्दुर्वारैवेति वाच्यम् ॥८५॥ पक्षधर्मिकसाध्य वैशिष्ट्यावगाहित्वाभावपदेन ह्रदधर्मिकवह्निवैशिष्ट्यावगाहित्वाभावस्यैव उपादा नात्तदधिकरणतानिष्ठप्रयोज्यतायां च स्वविषयतानिष्ठसाक्षात्प्रयोजकतानिरूपितत्व स्यापि सम्भवादव्याप्तयतिव्याप्त्योर्दूरोत्सारितत्वात् ॥८६॥

नच पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावपदेन पक्षतावच्छेदकतापर्या प्त्यधिकरणधर्मावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मा - वच्छिन्नप्रकारताकत्वाभाव एव विवक्षणीयः; अन्यथा ह्रदो वह्निमानित्याद्यौ ह्रदत्वभावव्याप्यवन्मेयत्वविशिष्टह्रदेऽतिव्याप्तिः, तत्र मेयत्वविशिष्टह्रदत्वावच्छिन्न विशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताकत्वाभावाधिकरणतायां तादृशह्रदत्वा वच्छिन्नविशेष्यतानिरूपितवह्न्यभावव्याप्यत्वावच्छिन्नविषयतायाः एव प्रयोजक त्वात् निरुक्तविशेषणाक्रान्तपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छे दकावच्छिन्नप्रकारताकत्वाभावप्रयोजकत्वसत्त्वात् । एवं जलाभावसाध्यकस्थले मेयत्वविशिष्टं यत्तादृशसाध्याभावव्याप्यं तद्ह्रदेऽतिव्याप्तिः — तत्र पक्षधर्मिक मेयत्वविशिष्टतादृशसाध्याभावव्याप्याभावत्वावच्छिन्नप्रकारताकत्वाभावाधिकरण — तायां निरुक्तविशिष्टान्तरविषयत्वाप्रयोज्यत्वस्य स्वविषयताप्रयोज्यत्वस्य सत्त्वात् । अतः पक्षतावच्छेदकतासाध्यतावच्छेदकतापर्याप्त्योर्निवेशावश्यकत्वेनोक्तपरिष्का-रस्य त्याज्यतया अतिव्याप्तिर्दुर्वारैवेति वाच्यम् ॥ ८७ ॥ अधिकव्यावृत्तन्यून

साधारणपर्याप्तेरेवात्र निवेशात् ; तथाहि– पक्षतावच्छेदकतापर्याप्त्यनुयोगिता वच्छेदकधर्मवृत्तिविशेष्यतानिरूपितसाध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकध र्मवृत्तिप्रकारताकत्वाभाव एवात्र निवेश्यते; वृत्तित्वञ्चोभयत्र स्वावच्छेदकता त्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन; एवञ्च मेयत्वघटितोक्तविशिष्ट द्वये नातिव्याप्तिः, हृदत्वनिष्ठपक्षतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकतद्व्यक्तित्वे मेयत्वहृदत्वोभयावच्छिन्नविशेष्यतायाः स्वावच्छेदकतापर्याप्त्यनुयोगितावच्छेद कत्वसम्बन्धेनासत्त्वादुक्तोभयत्वावच्छिन्नविशेष्यतायाः असंग्रहात् ; एवं वह्निव्याप्य जलाभावसाध्यकस्थलेपि मेयत्वघटिततादृशसाध्याभावव्याप्याभावत्वावच्छिन्नप्रका रतायाः अभावत्वनिष्ठसाध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकतद्व्यक्तित्वे निरु क्तसम्बन्धेनावर्तमानतया तस्यापि वारणात् । वह्निजलाभावोभयसाध्यकस्थले च वह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकतद्व्यक्तित्वे वह्नित्वा वच्छिन्नप्रकारतायाः निरुक्तसम्बन्धेन वर्तमानतया हृदत्वावच्छिन्नविशेष्यता निरूपितवह्नित्वावच्छिन्नप्रकारतायाः अपि प्रतियोगिकोटौ संग्रहसम्भवात् । एवञ्च निरुक्तपरिष्कारस्य निर्दोषतया निरुक्तातिव्याप्तिर्निरस्तैवेति ॥८८॥

नच तादृशप्रकारताकत्वत्वावच्छिन्नाभावस्यैव पक्षधर्मिकसाध्यवैशिष्ट्यावगा हित्वाभावपदेन विवक्षणीयतया वह्निजलाभावोभयसाध्यकस्थले केवलजला भावत्वावच्छिन्नप्रकारतासाधारणतादृशप्रकारताकत्वत्वावच्छिन्नाभावाधिकरणतायाः केवलवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताप्रयोज्यत्वाभावात् , तत्स्थलीयतादृश सत्प्रतिपक्षेऽव्याप्त्या निरुक्तपरिष्कारो न सम्भवत्येवेत्यतिव्याप्तिरिति वाच्यम्॥८९॥ तादृशप्रकारताकत्वनिष्ठप्रतियोगिताकाभावस्यैवावगाहित्वाभावान्तेन विवक्षणात् । निरुक्तसामान्याभावाविवक्षणेन उक्तव्याप्त्यप्रसक्त्या उक्तपरिष्कारेणैव उक्तातिव्याप्तेर्वारणीयत्वात् ॥९०॥

इति श्री रामशास्त्रिविरचिता सत्प्रतिपक्ष-शतकोटिः ॥

(*)